दाश्रयासिद्धिः असिद्धिदेशनाभासा चेयम् । विकल्पसमायान्तु पक्षे दृष्टान्ते च योधर्म्मस्तस्य विकल्पोविरुद्धः कल्पो व्यभिचारित्वम् उपलक्षणं चैतत् अन्यवृत्तिधर्मस्यापि बोध्यं व्यभिचारोऽपि हेतोर्धर्म्मान्तरं प्रति धर्म्मान्तरस्य साध्यं प्रति धर्म्मान्तरस्य धर्म्मान्तरं प्रति वा तथा च कस्यचिद्धर्मस्य क्वचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्यं प्रति व्यभिचारापादनं विकल्पसमा७ यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनाद्गुरुत्वस्यानित्यत्वव्यभिचारदर्शनादनित्यत्वस्य मूर्त्तत्वव्यभिचारदर्शनाद्धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदित्यनैकान्तिकदेशनाभासा चेयम् । पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनं स साध्यसमा८ तत्रायमाशयः एतत्प्रयोगसाध्यस्यैवानुमितिविषयत्वं तथा च पक्षादेरनुमितिविषयत्वात् साध्यवदेतत्प्रयोगसाध्यत्वम् अतः साध्यसमा । तथा हि पक्षादेः पूर्वं सिद्धत्वे एतत् प्रयोगसाध्यत्वाभावान्नानुमितिविषयत्वं पूर्वमसिद्धत्वे पक्षादेरज्ञानादाश्रयासिद्ध्यादयस्तद्देशनाभासा चेयम् । सूत्रार्थस्तु उभयसाध्यत्वात् उभयं पक्षदृष्टान्तौ तद्धर्म्मौ हेत्वादिः तत्साध्यत्वं तदधीनानुमितिविषयत्वं साध्यस्येव पक्षादेरपीति तुल्यतापादनमिति लिङ्गोपहितभानमते लिङ्गस्याप्यनुमितिविषयत्वात् साध्यसमत्वं हेतोश्च साध्यत्वे हेतुमान्दृष्टान्तोऽपि साध्य इत्याशयः” वृत्तिः ।

“किञ्चित्साधर्म्म्यादुपसंहारसिद्धेर्वैधर्म्म्यादप्रतिषेधः” सू०।

“एतासामसदुत्तरत्वे बीजमाह किञ्चित्साधर्म्यात् साधर्म्यविशेषात् व्याप्तिसहितात् उपसंहारसिद्धेः साध्यसिद्धेः वैधर्म्यादेतद्विपरीतात् व्याप्तिनिरपेक्षात् साधर्म्यमात्रात् भवता कृतः प्रतिषेधो न सम्भवतीत्यर्थः । अन्यथा प्रमेयत्वरूपासाधकसाधर्म्यात् तद्दूषणमप्यसम्यक् स्यादिति भावः । तथा चायं क्रमः अनित्यत्वव्याप्यात् कृतकत्वात् शब्देऽनित्यत्वमुपसंहरामो न तु कृतकत्वं रूपस्यापि व्याप्यं येन ततो रूपमप्यापादनीयं शब्दे, एवं अनित्यत्वं न रूपव्याप्यं येन रूपाभावादनित्यत्वाभावः शब्दे स्यात् एवं वर्ण्यसमेऽपि किञ्चित्साधर्म्यात् व्याप्यतावच्छेदकावच्छिन्नाद्धेतोः साध्यसिद्धिः तादृशहेतुमत्त्वञ्च दृष्टान्तता प्रयोजकं न तु पक्षे यावद्विशेषणावच्छिन्नो हेतुस्तावदवच्छिन्नहेतुमत्त्वम् अन्यथा त्वयाऽपि दूषणीयो दृष्टान्ती कर्त्तव्यः सोऽपि न स्यात् एवमवर्ण्यसमेऽपि व्याप्यतावच्छेदकावच्छिन्नस्य दृष्टान्तदृष्टस्य पक्षे सत्त्वात्साध्यसिद्धिर्न तु दृष्टान्तवृत्तियावद्धर्म्मावच्छिन्नस्य पक्षे सत्त्वम् । एवं विकल्पसमेऽपि प्रकृतसाध्यव्याप्यात् प्रकृतहेतोः साध्यसिद्धिस्तद्वैधर्म्यात् यत्किञ्चिद्व्यभिचारात् कृतः प्रतिषेधो न सम्भवति नहि यत्किञ्चिद्व्यभिचारादेव प्रकृतहेतोः प्रकृतसाध्यासाधकत्वमतिप्रसङ्गात् । एवं साध्यसमेऽपि व्याप्याद्धेतोः सिद्धे पक्षे साध्यसिद्धिर्न तु पक्षदृष्टान्तादयोऽप्यनेन साध्यन्ते तथा सति क्वचिदपि साध्यसिद्धिर्न स्यात् त्वदीयदूषणमपि विलीयेत” वृत्तिः ।

“साध्यातिदेशाच्च दृष्टान्तोपपत्तेः” सू०।

“वर्ण्यावर्ण्यसाध्यसमास्तु समाध्यन्तरमप्याह दृष्टान्तोपपत्तिर्दृष्टान्ततोपपत्तिः साध्यातिदेशात् दृष्टान्ते हि साध्यमतिदिश्यते तावतैव दृष्टान्तत्वमुपपद्यते नत्वशेषो धर्मः पक्षदृष्टान्तयोरभेदापत्तेः पक्षादेरपि साध्यसमत्वमतेन प्रत्युक्तं दृष्टोऽन्तो दृष्टान्तः पक्षः तस्माद्वह्निमानित्यतः पक्षोत्कीर्त्तनात्तथा च साध्यस्यातिदेशात् साधनात् पक्ष इत्युच्यते न तु पक्षोऽपि साध्यतेऽतिप्रसङ्गादिति भावः” वृत्तिः ।

“प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्या अविशिष्टत्वादप्राप्त्या असाधकत्वाच्च प्राप्त्यप्राप्तिसमौ” ५।१।७ सू० ।

“क्रमप्राप्तौ प्राप्त्यप्राप्तिसमौ लक्षयति । हेतोरिति साधकत्वमिति शेषः प्राप्तिपक्षे दोषमाह प्राप्त्या अविशिष्टत्वादिति द्वयोरपि प्राप्तत्वाविशेषात् किङ्कस्य साधकं अप्राप्तिपक्षे दोषमाह अप्राप्त्या इति अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात् साधकत्वञ्चात्र कारकज्ञापकसाधारणम् एवञ्च कारकज्ञापकलक्षणं साधनं कार्य्यज्ञाप्यलक्षणेन साध्येन सम्बद्धं सत्साधकं चेत्तदा सत्त्वाविशेषान्न कार्य्यकारणभावः सत्सम्बन्धस्य प्रागेव ज्ञातत्वान्न ज्ञाप्यज्ञापकभावः प्राप्तयोर्न जन्यजनकभावः प्राप्तत्वेन लवणोदकयोरिवाभेदादित्याशय इत्यन्ये । तथा च प्राप्त्या अविशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमा९ । यदि चाप्राप्तं लिङ्गं साध्यबुद्धिं जनयति साध्याभावबुद्धिमेव किन्तेन न जनयेत् अप्राप्तत्वाविशेषात् तथा चाप्राप्त्या साधकत्वादनिष्टापादनमप्राप्तिसमा१० प्रतिकूलतर्कदेशनाभासे चेमे” वृत्तिः ।

“घटादिनिष्पत्तिदर्शनात् पीड़ने चाभिचारादप्रतिषेधः” सू०।

“अनयोरसदुत्तरत्वे बीजमाह । दण्डादितो घटादिनिष्पत्तेर्दर्शनात् सर्वलोकप्रत्यक्षसिद्धत्वादभिचारात् श्येनादितः शत्रुपीड़ने च व्यभिचारान्न त्वदुक्तः प्रतिषेधः